

सोमज्योतिः

Shree Somnath Sanskrit University
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.shreesomnathsanskrituniversity.info

University Newsletter
Issue: **12** Month: **December** Year: **2015**

June 2015 To December 2015 सोमज्योतिः



कुलपतिवाक्

हर्षप्रकर्षोऽनुभूयते यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयः अत्राधीयानानां छात्राणां सर्वाङ्गीणविकासाय शास्त्राध्ययनेन सह नानाविधं सहशैक्षिकक्रियाकलापं समायोजयति निर्धारिते च काले काले।

विश्वविद्यालयपक्षतः सञ्चाल्यमानान् कार्यक्रमान् समाश्रित्य षाण्मासिकीं " सोमज्योतिः " इति पत्रिकां प्राकाश्यमानामवलोक्य भृशं मोमुदीति मे मनः । विश्वविद्यालयकार्यक्रमाणां दर्पणभूतायां पत्रिकायामस्यां सोमज्योतिरिति नाम्न्यां प्रायेण निम्नाङ्किता गतिविधयः संगृहीताः सन्ति येषां साक्षात्कर्तृत्वेनोल्लेखोऽवश्यं करणीयः । अम्बेडकरजयन्ती, राज्यसर्वकारपक्षतः आयोजिताय महिलासशक्तीकरणाय पाक्षिककार्यक्रमाः, स्वातन्त्र्यपर्व, नवरात्रमहोत्सवः, गणेशोत्सवः, नवमः युवमहोत्सवः, सरदारवल्लभभाईजयन्ती, राष्ट्रियसेवायोजनाकार्यक्रमाः, विश्वसंस्कृतसम्मेलने भागं गृहीतवतः उल्लेखः, संस्कृतविज्ञानप्रदर्शनी, विश्वविद्यालयप्रवेशद्वारनिर्माणप्रक्रिया, विश्वविद्यालयस्य भौतिकविकासाय बौद्धिकविकासाय च क्रियमाणानि कृतानि च कार्याणि इत्यादीनां समावेशोऽत्र दृश्यते।

प्रकाशनकार्येऽस्मिन् निरन्तरं संलग्नाय संशोधनाधिकारिणे डॉ. कार्तिकपण्ड्यामहोदयाय तथा च सहयोगप्रदातृभ्यः डॉ. ललितपटेल, डॉ. जानकीशरण, डॉ. शत्रुघ्नपाणिग्रहीमहोदयेभ्यः अनेकशः वर्धापनानि शुभकामनाश्च।

विश्वसंस्कृतसम्मेलनम् -२०१५

भारतसर्वकारद्वारा विदेशमन्त्रिपदारूढायाः श्रीमत्याः सुषमास्वराजमहोदयायाः उपस्थितौ षोडशं विश्वसंस्कृतसम्मेलनं थाईलेण्डदेशस्य बेंकोकनगरे २८/६/१५ तः २/७/१५ पर्यन्तं सम्पन्नमभवत् । तत्र प्रायः ६० देशेभ्यो विद्वांसः सम्मिलिता अभवन् । भारतसर्वकारपक्षतः प्रायः १७ विद्वांसः विविधराज्येभ्यः चिताः ये भारतदेशस्य प्रतिनिधिरूपा आसन्। संस्कृतविश्वविद्यालयस्य प्रवर्तमानाः कुलपतयः प्रो.अर्कनाथचौधरी-महोदयाः तथा च डो.अमृतलालभोगायता तेषु विद्वत्सु चिता अभवन् । श्रीसोमनाथसंस्कृत विश्वविद्यालयस्य विश्वसंस्कृतसम्मेलनं पूर्वोक्तरीत्या गौरववृद्धिकरमभवत्।

"प्रभासज्योतिः" शैक्षणिकभवनस्योद्घाटनोत्सवः



वामतः श्रीभूपेन्द्रसिंहचुडासमा, मुख्यमन्त्री श्रीमती आनन्दीबेनपटेल, प्रो. वसुबेनत्रिवेदी, श्री जशाभाईबारड

०४/०६/२०१५ तमे दिनाङ्के गुजरातसर्वकारेण प्रदत्तधनेन निर्मितस्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवनस्योद्घाटनोत्सवः सोल्लासं समजायत । अवसरेऽस्मिन् परिसरे यज्ञादिकार्यक्रमाः समायोजिताः । गुजरातराज्यस्य लोकप्रियमुख्यमन्त्रिणः श्रीमत्याः आनन्दीबेनपटेलमहोदयायाः करकमलाभ्यां नूतनभवनस्य लोकार्पणं जातम्। प्रवचनप्रसङ्गे स्वनामधन्या मुख्यमन्त्रिमहाभागा समवदत् यत् अस्माकं राष्ट्रे दृश्यमानानां समस्यानां विवादानां च शमोपायः संस्कृतमेवास्ति। अतः संस्कृतस्य प्रचारप्रसारयोः अङ्गनवाटिकातः प्रारम्भः करणीयः । पञ्च वाक्यानि संस्कृते सर्वे छात्राः यथा वदेयुः तदर्थं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य महद्योगदानमपेक्ष्यते।



वामतः मुख्यमन्त्री श्रीमती आनन्दीबेनपटेल, श्रीभूपेन्द्रसिंहचुडासमा, प्रो. वसुबेनत्रिवेदी



वामतः मुख्यमन्त्री श्रीमती आनन्दीबेनपटेल, पूर्वकुलपतिः प्रो. वेम्पटिकुटुम्बशास्त्री, श्रीभूपेन्द्रसिंहचुडासमा

कार्यक्रमस्य प्रारम्भे विश्वविद्यालयस्य कुलपतयः प्रो. वेम्पटिकुटुम्बशास्त्रिमहोदयाः विश्वविद्यालयस्य कृतित्वविषये समस्याविषये च मुख्यमन्त्रिमहोदयानां दृष्ट्याकर्षणं कृतवन्तः। विशिष्टातिथित्वेन शिक्षामन्त्रिणः श्रीभूपेन्द्रसिंहचुडासमामहोदयाः, सम्माननीयातिथित्वेन उडुयनमन्त्रिणः (राज्यकक्षा) जसाभाईबारडमहोदयाः, सारस्वतातिथित्वेन शिक्षामन्त्रिणः (राज्यकक्षा) प्रो. वसुबेनत्रिवेदीमहोदयाः च उपस्थिताः आसन् । अनेन प्रकारेण सगौरवं कार्यक्रमः सम्पन्नः।

Chief Editor
Prof. Ark Nath Chaudhary

Managing Editor
Dr. Dashrath Jadav

Editors
Dr. Kartik Pandya
Dr. Lalit Patel

Assistant Editors
Dr. Satrughna Panigrahi
Dr. Janakisharan

Technical Assistant
Shri Haresh Kher

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** *(Bi-annual Newsletter of Shree Somnath Sanskrit University)* from affiliated colleges, recognized study centers & approved research centers of Shree Somnath Sanskrit University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

Address:
The Editor
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist. Gir-Somnath, Gujarat–362 266.
(O) 02876-244532

E-mail: sssu.veraval@gmail.com

Statement about the ownership and other particulars about newspapers

SOMAJYOTIḤ

FORM IV

(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

1. Place of the Publication	: Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication	: Bi-annual (Half-Yearly)
3. Printer's Name	: **Sudarshan Graphics**
Nationality	: Indian
Address	: Tirupati Avenue, Kankaria, Maninagar, Ahmedabad-380028
4. Publisher's Name	: The Registrar
Nationality	: Indian
Address	: Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name	: The Vice-Chancellor
Nationality	: Indian
Address	: Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital	: Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266

I, Dr. Dashrath Jadav, Registrar (I/c), Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

कुलपतिदैनन्दिनी

१३/०७/२०१५– श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिपदभारग्रहणम्।

१८/०७/२०१५– श्रीसोमनाथमन्दिरपरिसरभागे आयोजिते पश्चिमक्षेत्रीय–इतिहासपरिषत्संगोष्ठ्याम् उद्घाटनसत्रस्य अध्यक्षता।

३०/०७/२०१५– अहमदाबादनगरे दर्शनम् संस्कृतमहाविद्यालये श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कार्यकारिपरिषदः, शैक्षणिकपरिषदश्च उपवेशनस्य अध्यक्षता तत्रैव गुरुपूर्णिमायाः पूर्वदिवसे व्याख्यानं संस्थया सम्माननञ्च।

३१/०७/२०१५– एच.के.आर्ट्स कालेज अहमदाबादनगरे एवं भागवतविद्यापीठे गुरुपूर्णिमावसरे व्याख्यानम्।

०१/०८/२०१५– अहमदाबादनगरे विश्वविद्यालयसम्बद्धमहाविद्यालयानां प्राचार्यैः साकम् उपवेशनम्।

०२/०८/२०१५– युनिवर्सिटीसंशोधनकेन्द्र–भारतीयतत्त्वज्ञानमंदिर–मोडासा इत्यत्र नूतनभवनस्य उद्घाटनम्।

११/०८/२०१५– पोलिस–अधीक्षक–गीरसोमनाथजनपदद्वारा आयोजिते महिलासशक्तीकरणस्य पाक्षिकसमारोहे कर्मयोगिदिवसे मुख्यातिथिः।

१३/०८/२०१५– श्रीसोमनाथसंस्कृतविश्वविद्यालय–वेरावले सौराष्ट्रविश्वविद्यालयस्य ''एकेडेमीक स्टाफ'' महाविद्यालयस्य प्राध्यापकसभायां मुख्यातिथित्वेन व्याख्यानम्।

२१/०८/२०१५– अहमदाबादनगरस्थगुजरातविश्वविद्यालये कुलपतिसम्मेलने भागग्रहणम्।

२८/०८/२०१५– श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतसप्ताहोत्सवस्य अध्यक्षता।

२९/०८/२०१५– मुम्बईनगरस्थराष्ट्रियसंस्कृतसंस्थानस्य मुम्बईपरिसरे आयोजिते संस्कृतसप्ताहकार्यक्रमे अध्यक्षः।

०३/०९/२०१५– वाराणसीस्थकाशीहिन्दूविश्वविद्यालयस्य कलाधर्मविज्ञानसङ्कायेन आयोजितस्य संस्कृतसप्ताहमहोत्सवस्य पूर्णतादिवसे मुख्यातिथिः।

–रानीपद्मावती–तारायोग–तंत्र–आदर्शसंस्कृतमहाविद्यालय–वाराणसी द्वारा आयोजिते प्रो.वी.वेङ्कटाचलस्मृतिव्याख्याने मुख्यातिथिः संस्थाद्वारा सम्माननञ्च।

१५/०९/२०१५– नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानस्य ''बोर्ड ओफ मैनेजमेन्ट'' उपवेशने सदस्यरूपेण भाग्रहणम्।

२४/०९/२०१५– श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शोधसमितेः(R.D.C.) उपवेशने अध्यक्षत्वम्।

२६/०९/२०१५– अहमदाबादनगरस्थकेन्द्रीयविश्वविद्यालये आयोजिते कुलपतीनां उपवेशने (N.E.P.- २०१५) इति अधिवेशने भागग्रहणं विमर्शः च।

२८/०९/२०१५– गांधीनगरस्य स्वर्णिमसंकुलमध्ये आयोजिते उपवेशने विश्वविद्यालयविकासाय माननीयशिक्षणमन्त्रिणां भूपेन्द्रसिंहचुडासमामहोदयानाम् आध्यक्ष्ये माननीयशिक्षणराज्यमन्त्रिणः प्रो.वसुबेनत्रिवेदीमहोदयायाः, अग्रसचिवमहोदयानां, शिक्षणायुक्तमहोदयानां च उपस्थितौ कुलसचिवमहोदयेन डो. दशरथजादवेन सह भागग्रहणम्।

०२/१०/२०१५– BAPS स्वामिनारायणसंस्कृतमहाविद्यालये वैदेशिकच्छात्राणां प्रवेशोत्सवकार्यक्रमे शिक्षणमन्त्रिणाम् आध्यक्ष्ये मुख्यातिथिः।

०७/१०/२०१५– होटल–अशोका– चाणक्यपुरी – नवदेहलीस्थितस्य ''इन्डियन नेशनल कमिशन फोर को–ओपरेशन विथ युनेस्को'' – इत्यस्य संस्थागतसदस्यत्वेन भागग्रहणम्।

१४/१०/२०१५– श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विकासाय अग्रिमपञ्चवर्षीयकार्यक्रमं निर्धारयितुं माननीयया मुख्यमन्त्रिमहोदयया सह उपवेशनं विमर्शः च।

१५/१०/२०१५– डो.बाबासाहेब–आम्बेडकरमुक्तविश्वविद्यालयस्य गोपनीयकार्ये भागग्रहणम्।

१६/१०/२०१५– पोरबन्दरनगरे श्रीरमेशभाई–ओझा–सञ्चालितस्य सान्दीपनीविद्यानिकेतनस्य नवनिर्मितभवनोद्घाटनसमारोहे अतिथित्वेन भागग्रहणम्।

२४/१०/२०१५– श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नवमयुवमहोत्सवस्य उद्घाटनसत्राध्यक्षः।

२८/१०/२०१५– श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नवमयुवमहोत्सवस्य समापनसत्राध्यक्षः।

२६/१०/२०१५ – विश्वविद्यालयसम्बद्धसंस्थानां निरीक्षणसमित्याः सदस्यैः साकं सम्बद्ध संस्थानां निरीक्षणम्।

२५/११/२०१५– श्रीस्वामिनारायणगुरुकुल–वडतालनगरे आयोजिते अखिलभारतीयसंस्कृतशास्त्रस्पर्धायाः राज्यस्तरीयचयनसमारोहस्य उद्घाटनसत्रे विशिष्टातिथिः।

०५/१२/२०१५– गुजरातविश्वविद्यालय–अहमदाबादनगरे आयोजिते "International Seminar on Energizing Cultures" इत्यस्य समानपनसत्रे विशिष्टातिथिः।

११/१२/२०१५– जैनविश्वभारतीविश्वविद्यालयलाडनुमध्ये आयोजिते 'एन्युल कोन्फरन्स ओफ इन्डियन सोसायटी बुद्धीस्ट स्टडीज' इत्यस्य उद्घाटनसत्रे मुख्यातिथिरूपेण एवं '' बौद्धदर्शने – माध्यमिकमतालोचनम्'' इति शीर्षकेण व्याख्यानम्।

२८/१२/२०१५– वटोदरस्थमहाराजासयाजीरावगायकवाडविश्वविद्यालयस्य प्राच्यविद्यामन्दिरे आयोजितायां तत्त्वबोधव्याख्यानमालायां व्याख्यानम् ।

२९/१२/२०१५ – वटोदरस्थमहाराजासयाजीरावगायकवाडविश्वविद्यालयस्य संस्कृतविभागे आयोजितायाम् एकदिवसीयायां संगोष्ठ्यां आनन्दमीमांसाविषयोपरि मुख्यवक्तृरूपेण (Keynote Address) व्याख्यानम्।

श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजितः संस्कृतसप्ताहोत्सवः

प्रतिवर्षमिव अस्मिन् वर्षेऽपि २६.८.२०१५ तः १.९.२०१५ पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतसप्ताहोत्सवः सोत्साहम् आचरितः। उत्सवस्यास्य अङ्गतया विश्वविद्यालये नैकासां स्पर्धानाम् आयोजनं कृतमासीत्। आसु स्पर्धासु वेरावलतालुकाक्षेत्रे विद्यमानेषु माध्यमिक-उच्चमाध्यमिक-विद्यालयेषु महाविद्यालयेषु च पठन्तः २५५ छात्राः भागम् अवहन्। उत्सवस्यास्य उद्घाटने एल्. एन्. मिथिलाविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचराः प्राच्यपाश्चात्यविद्यानिपुणाः महान्तो वैयाकरणा दार्शनिकाश्च प्रोफेसर हृषीकेश-झा-महाभागाः समुपस्थाय छात्रान् प्रेरितवन्तः। तैः समं रमौली, नवादा इत्यत्र विद्यमानस्य राष्ट्रियसंस्कृतसंस्थानस्य आदर्शसंस्कृतमहाविद्यालयस्य प्राचार्याः डॉ कामेश्वरचौधरी महाभागाः अपि उद्घाटनकार्यक्रमे अतिथित्वेन संप्राप्ताः। तैः अपि स्वीये उद्बोधने संस्कृतभाषायाः, संस्कृताध्ययनस्य च महत्त्वं ज्ञापितम्। सप्ताहेऽस्मिन् प्रवृत्तानां स्पर्धानां सङ्क्षिप्तं वृत्तम् इत्थम् -

क्रमः	स्पर्धा	भागग्राहिणः				आहत्य
		माध्यमिक-विद्यालयेभ्यः	उच्चमाध्यमिक-विद्यालयेभ्यः	महाविद्यालयेभ्यः	विश्वविद्यालयीयाः	
१	वक्तृत्वस्पर्धा	७	१	०	१५	२३
२	कथाकथनस्पर्धा	५	१	०	७	१३
३	रङ्गवल्लीस्पर्धा	११	९	६	९	३५
४	निबन्धलेखनस्पर्धा	८	२	०	१२	२२
५	श्लोकगानस्पर्धा	११	६	१	२४	४२
६	समूहगानस्पर्धा	४८	१९	०	२४	९१
७	विज्ञापनस्पर्धा	०	०	०	१५	१५
८	रसप्रश्नाः	०	०	०	१४	१४
	आहत्य	९०	३८	७	१२०	२५५

उत्सवस्यास्य समारोपकार्यक्रमः १.९.२०१५ दिनाङ्के सम्पन्नः। कार्यक्रमेऽस्मिन् वेरावलनगरस्य वरिष्ठः अधिवक्ता श्रीमान् किशोर कोटक विशिष्टातिथित्वेन समुपस्थाय संस्कृतभाषायाः, विविध-स्पर्धासु भागग्रहणस्य च महत्त्वम् अबोधयत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रोफेसर अर्कनाथ चौधरी महाभागाः अपि कार्यक्रमे समुपस्थाय संस्कृतानुरागिणः समबोधयन्। संस्कृतभाषायाः व्यापकाय प्रचाराय ईदृश-स्पर्धानां महत्त्वं व्यज्ञापयन्। तेन सममेव संस्कृतप्रचारकार्ये प्रौद्योगिकी-उपयोगस्य सम्भावनाः अपि अचर्चयन्। आगामिषु वर्षेषु इतोऽपि महता वैभवेन संस्कृतसप्ताहोत्सवः आचरितः भवेत् इति तदीयं संकल्पमपि ते प्राकटयन्।

UGC NET/SLET प्रशिक्षणकेन्द्रम् -२०१५



श्रीसोमनाथसंस्कृतविश्वविद्यालये Knowledge Consortium Of Gujarat इति संस्थायाः सहयोगेन विश्वविद्यालयानुदानायोगायोजितायाः राष्ट्रियपात्रतापरीक्षायाः (NET), राज्यसर्वकारेणायोजितायाः राज्यस्तरीयपात्रतापरीक्षायाः (SLET) च प्रशिक्षणं दातुं प्रशिक्षणशिबिरमुद्घाटितम्। अस्य प्रशिक्षणकेन्द्रस्य उद्घाटनकार्यक्रमः स्वस्तिश्रीकीलक-भाद्रपदकृष्ण-अष्टमी-सोमवासरे ०५-१०-२०१५ तमे दिनाङ्के विश्वविद्यालयस्य सभागारे अभवत्।

अस्मिन् उद्घाटनकार्यक्रमे सोमनाथन्यासस्य (Somnath Trust) सचिवमहोदयः तथा गुजरातसर्वकारस्य पूर्वमुख्यसचिवमहोदयः (Ex. Chief Secretary of Gujarat) श्री पी. के. लहरीमहाभागः मुख्यातिथिपदमलम्करोत्। सोमनाथन्यासस्य (Somnath Trust) कार्यकारि-अधिकारिमहोदयः (Manager In-charge) श्रीविजयसिंहचावडामहाभागः कार्यक्रमे विशिष्टातिथिपदे आसीत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. अर्कनाथचौधरीमहाभागः कार्यक्रमेऽस्मिन् अध्यक्षपदमलमकरोत्। अस्मिन् उद्घाटनकार्यक्रमे कार्यकारिकुलसचिवस्य डॉ. दशरथजादवमहोदयस्य विशेषोपस्थितिरासीत्।

कार्यक्रमस्यारम्भः वैदिक्या प्रार्थनया समभवत्। युजीसी-नेट्/स्लेट्-प्रशिक्षणकेन्द्रस्य संयोजकेन प्रो. विनोदकुमारझावर्येण समागतानाम् अतिथीनां स्वागतं विधाय अस्य प्रशिक्षणकेन्द्रस्य प्रास्ताविकं ज्ञापितम्। मुख्यातिथिपदेन वदता श्री पी. के. लहरीमहाभागेन उच्चरतशिक्षाक्षेत्रे गुणवत्तामवाप्तुं गुजरातसर्वकारेण अनुष्ठीयमानानां क्रार्यक्रमाणां विषये प्रासङ्गिकमुद्बोधनं प्रदत्तम्। महोदयेन उक्तं यद् गुजरातस्य महाविद्यालयेषु विश्वविद्यालयेषु पदानि रिक्तानि सन्ति परं योग्यानां प्राध्यापकानाम् अभावः वर्तते। अतः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आरब्धमिदं प्रशिक्षणमवश्यं छात्राणां कृते उपयोगाय भविष्यति। मान्यकुलपतिना छात्राणां सर्वविधविकासाय विश्वविद्यालयेन प्रचाल्यमानान् कार्यक्रमान् विज्ञाप्य अस्य प्रशिक्षणकेन्द्रस्य महत्त्वं प्रकटितम्। कार्यक्रमस्याने कार्यकारिकुलसचिवेन डॉ. दशरथजादवमहाभागेन धन्यवादभाषणं विहितम्। समग्रास्य कार्यक्रमस्य सञ्चालनं युजीसी-नेट्/स्लेट्-प्रशिक्षणकेन्द्रस्य सहसंयोजकः श्रीजानकीशरणः अकरोत्। सम्प्रति अस्मिन् प्रशिक्षणकेन्द्रे युजीसी-नेट्/स्लेट्-परीक्षायाः प्रथम-द्वितीय-तृतीयप्रश्नपत्रेषु द्वितीय-तृतीयप्रश्नपत्रयोः संस्कृतविषयमाधारीकृत्य अभ्यासः कार्यते।



कार्यकालसमाप्तौ सौप्रस्थानिकसमारोहः



१२-०६-२०१५ दिनाङ्के श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतीनां प्रो.वेम्पटीकुटुम्बशास्त्रिणां कौलपत्यकार्यकालसमाप्तौ सत्यां सौप्रस्थानिकसमारोहः कार्यकारिकुलसचिवस्य डॉ.दशरथजादवमहोदयस्याध्यक्षत्वे समायोजितः । अत्र सर्वैः प्राध्यापकैः कर्मचारिभिश्च ससम्मानमत्रभवतां सौप्रस्थानिकमङ्गलमाचरितम् ।

वित्ताधिकारिमहोदयस्य सौप्रस्थानिकसमारोहः

१९/०९/२०१५ तमे दिनाङ्के वित्ताधिकारी श्रीब्रिजेशमहेता श्रीसोमनाथ-संस्कृतविश्वविद्यालयये स्वकीयकार्यकालं समाप्य स्थानान्तरं प्राप्तवान् तदर्थं विश्वविद्यालयपक्षतः सौप्रस्थानिकमङ्गलमाचरितम् । विश्वविद्यालयपरिवारः महोदयस्य सुखदजीवनं कामयते।

नूतनकुलपतेः नियुक्तिसमारोहः

१३-०७-२०१५ तमे दिनाङ्के प्रो. अर्कनाथचौधरीमहाभागाः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतित्वेन कार्यभारं स्वीकृतवन्तः । इमे ह्याचार्याः पूर्वं राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरं प्राचार्यत्वेन सनाथीकृतवन्तः । एतेषां कार्यभारग्रहणसमये विश्वविद्यालयाध्यापकैः कर्मचारिभिश्च कुलपतिमहोदयानां स्वागतं सोल्लासं विहितम् ।

भारतीयतत्त्वज्ञानमन्दिरस्य नूतनभवननिर्माणम्

विश्वविद्यालयसंलग्नसंशोधनसंस्थायाः 'एच्.वी.यु.बी.पौराणिक-इन्डॉलोजी-ईन्स्टीटयूट्' इति नूतनेनाभिधानेन सह नूतनभवनस्य लोकार्पणसमारोहः सम्पन्नः । कार्यक्रमेऽस्मिन् परमपूज्याः १०८ कांकरोलीयुवराज-श्रीवागीशबावाजीमहोदयाः अध्यक्षताम् अकुर्वन् । तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो.अर्कनाथचौधरीमहोदयाः मङ्गलम् उद्बोधनं कृतवन्तः । उच्चशिक्षणनिदेशकाः मान्याः पगीमहोदयाः अपि शुभेच्छाः प्रकटितवन्तः । श्रीमहेनभाई-देसाईजी अस्य भवनस्य कृते ५,००,००० रूप्यकाणां धनदानं इन्दिराबेनस्मृतौ कृतवान् । भवननिर्माणे २२,००,००० रूप्यकाणां व्ययः अभूत् ।

वार्तापत्रेषु विश्वविद्यालयः



संग्रहकर्ता :
विशालजोषी

।। गुजरातसर्वकारायोजितः महिलासशक्तिकरण-पाक्षिक-कार्यक्रमः ।।

गुजरातसर्वकारद्वारा महिलासशक्तीकरणपक्षस्य आयोजनं १-८-२०१५ तः १४-८-२०१५ दिनाङ्कं यावत् समभवत् । तस्मिन् विविधकार्यक्रमाः समायोजिताः । तस्यानुसन्धाने १-८-२०१५ तमदिनाङ्के ''महिला-सुरक्षा-दिनस्य''आयोजनमभवत् । अस्मिन् ''महिलासुरक्षासहाय'' (हेल्पलाइन-१८१) इति प्रकल्पस्य अधिकारिण्यः भगिन्यः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रान् उद्बोधितवत्यः । विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षाः प्रो.देवेन्द्रनाथपाण्डेयमहोदयः, प्रो.अर्चनादुबेमहाभागा, प्रो.विनोदकुमारझामहोदयः कार्यक्रमे स्वीयोपस्थित्या सह मार्गदर्शनं कृतवन्तः । सम्पूर्णकार्यक्रमस्य सञ्चालनं डॉ.रमेशचन्द्रशुक्लमहोदयेन कृतम् ।

तस्मिन्नेव पाक्षिक-कार्यक्रमे ७-८-२०१५ तमदिनाङ्के ''महिलाकारकीर्दीदिवसस्य'' आयोजनम् अभवत् । तस्मिन् कार्यक्रमे अतिरिक्तजिलाधीशः एवं उपदण्डाधिकारी श्रीमतीकल्पनाबेनत्रिवेदी तथा उपसमाहर्ता श्रीदर्शनाबेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रान् उद्बोधितवत्यौ । कार्यक्रमस्य अध्यक्षत्वेन कुलसचिववर्याः डॉ. दशरथजादवमहोदयाः मार्गदर्शनं दत्तवन्तः । विश्वविद्यालयस्य पुरतः मत्स्यपालनमहाविद्यालयस्य १३० छात्राः, १० अध्यापकाश्च कार्यक्रमे उपस्थिताः आसन् । सम्पूर्णस्य क्रार्यक्रमस्य सञ्चालनं डॉ.अमृतलालभोगायता अकरोत् ।

१४-८-२०१५ तमे दिनाङ्के अस्य पक्षस्य अन्तिमदिवसः ''महिलाशारीरिकसौष्ठवदिवस''त्वेन आचरितः । अस्मिन् कार्यक्रमे जनपदशिक्षणाधिकारी श्रीके.पी.पटेलमहोदयः अध्यक्षत्वेन उपस्थाय मार्गदर्शनं व्याख्यानञ्चाकरोत् । श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः प्रो.देवेन्द्रनाथपाण्डेयः तथा साहित्यविभागाध्यक्षा प्रो.अर्चनादुबे अतिथिरूपेणोपस्थाय मार्गदर्शनमकुरुताम् । अत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेरावल-सर्वकारिविद्यालयस्य च विद्यार्थिन्यः, वेरावलस्य शिक्षिकाः अन्याश्च भगिन्यः उपस्थितवत्यः । कार्यक्रमेऽस्मिन् योगविभागस्य छात्राः योगप्रदर्शनमकुर्वन् । योगविषये मार्गदर्शनं फाल्गुनीपृच्छक कृतवती । शारीरिकसौष्ठवविषये ''सेल्फ-मेडिटेशन'' विषये च प्रा.जयेश डी.मुंगरा व्याख्यानं दत्त्वा कार्यक्रमस्य संयोजनम् अकरोत् । कार्यक्रमस्य सफलं सञ्चालनं डॉ. अमृतलालभोगायताद्वारा सञ्जातम् । विश्वविद्यालयपक्षतः अस्य कार्यक्रमस्य संयोजनं डॉ.ललितपटेलः कृतवान् ।

।। छात्रावासे समाचरितः गणेशोत्सवः ।।

श्रीसोमनाथसंस्कृतविश्वविद्यालयच्छात्रैः प्रतिवर्षं छात्रावासे श्रीगणेशोत्सवस्यानुष्ठानं शास्त्रोक्तपद्धत्या क्रियते । भाद्रपदमासे शुक्लपक्षे चतुर्थ्यां दिनाङ्कानुसारेण १७-०९-२०१५ गुरुवासरे विश्वविद्यालयस्थानां समेषां गुरुचरणानां सान्निध्ये श्रीगणेशविग्रहस्य स्थापना जाता । तत्र कुलसचिवमहोदयाः सपरिवारं मुख्ययजमानपदे उपविष्टाः । ततश्च च्छात्रैरेव शास्त्रोक्तपद्धत्या पूजाविधिः कारितः । एकादशदिनानां श्रीगणेशस्थापनावसरेऽस्मिन् छात्रैः सम्भूय छात्रावासे सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् इति गणपत्यथर्वशीर्षस्थं फलश्रुतिवाक्यमेकं सफलीकृतम् ।

छात्रैः अष्टोत्तरसहस्रगणपत्यथर्वशीर्षस्य पाठात्मकमनुष्ठानं सश्रद्धं विहितम् । अन्ते गणपतिविसर्जनोत्सवस्यानुष्ठानस्यास्य च पूर्णाहुतिः सञ्जाता । संस्कृतिरक्षायै विश्वविद्यालयेनोत्सवोऽयं समनुष्ठितः । छात्रालयाध्यक्षाणां डॉ.पङ्कजकुमाररावलमहोदयानाम् इतरेषां च अध्यापकानां मार्गदर्शनेन विघ्नविनायकस्योत्सवः निर्विघ्नेन सम्पन्नतां गतः ।

राष्ट्रियसेवायोजना (*N.S.S.*)

श्रीसोमनाथसंस्कृतयुनिवर्सिटीसञ्चालितसंस्कृतकॉलेजवेरावलस्य राष्ट्रियसेवायोजना (N.S.S.) विभागद्वारा सम्पन्नानां कार्यक्रमाणां परिचयः -

संस्कृतसप्ताहोत्सवकार्यक्रमान्तर्गतः २५-८-१५ तमे दिनाङ्के विश्वविद्यालयपरिसरस्वच्छताकार्यक्रमः ।

गांधीनगरस्थस्य उच्चशिक्षणकमिश्नरमहोदयस्य १०/०९/२०१५ तमदिनाङ्कस्य पत्रानुसारं स्वच्छताभियानान्तर्गतं श्रीसोमनाथसंस्कृतयुनिवर्सिटीसञ्चालितसंस्कृतकॉलेज वेरावलस्य राष्ट्रियसेवा- योजना-(N.S.S.)विभागद्वारा विशालशोभायात्रायाः आयोजनं १६/०९/२०१५ तमे दिनाङ्के जातम् ।

श्रीसोमनाथसंस्कृतयुनिवर्सिटीसञ्चालितसंस्कृतकॉलेजवेरावलेन राष्ट्रियसेवायोजनादिवसं निमित्तीकृत्य राष्ट्रियगुणोद्भावकव्याख्यानस्यायोजनं २४/०९/२०१५ तमे दिनाङ्के कृतम् ।

श्रीसोमनाथसंस्कृतयुनिवर्सिटीग्रन्थालयः

विश्वविद्यालयग्रन्थालये २०१४-१५ इति वर्षे २,१२,९८० रूप्यकाणां ग्रन्थविक्रयणमभवत् । द्वादशसंख्यकानां संशोधनपत्रिकाणामपि वर्षेऽस्मिन् सन्निवेशः जातः । ग्रन्थालयसमितेः वारद्वयम् उपवेशनमभवत् । ग्रन्थालयसम्बन्धिनियमाः रचिताः । तत्र Book Bank योजना, पुस्तकक्रयणसम्बद्धनियमाः, पुस्तकपरावर्तननियमाश्च रचिताः ।

।। स्वातन्त्र्यपर्व ।।

भारतदेशस्य नवषष्टितमो (६९) स्वातन्त्र्यपर्वणि श्रीसोमनाथसंस्कृतविश्वविद्यालये ध्वजवन्दनसमारोहः समायोजितः । तत्र विश्वविद्यालयस्य मान्यैः कुलपतिभिः प्रो.अर्कनाथचौधरीमहाभागैः ध्वजवन्दनं कृतम् । तदनतरं तैः उत्साहयुतैः वचोभिः मार्मिकं प्रवचनं प्रदत्तम् । विश्वविद्यालयस्य च्छात्राः स्वप्रतिभावं प्रकटीकृतवन्तः । छात्राभिः देशभक्तिगीतस्योपरि सुन्दरं नृत्यमपि प्रदर्शितम् । मिष्टान्नवितरणेन सह अयं कार्यक्रमः पूर्णतां प्राप्तः । सम्पूर्णस्य कार्यक्रमस्य सञ्चालनं दर्शनसङ्कायाध्यक्षेन डॉ.जानकीशरणमहोदयेन संयोजनं च जयेशमुंगरामहोदयेन कृतम् ।

।। नवरात्रमहोत्सवः।।

श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिवारेण १७/१०/२०१५ तमे दिनाङ्के आश्विनशुक्लचतुर्थ्यां ''प्रभासज्योति''परिसरे मान्यानां कुलपतिमहोदयानां, माननीयानां कुलसचिवमहोदयानां तथा च आदरणीयानामनुस्नातकभवनाध्यक्षानां, मान्यानां स्नातकभवनप्राचार्याणां समेषाञ्च प्राध्यापकानां कर्मचारिणां विद्यार्थिनां च समुपस्थितौ जगदम्बाप्रीत्यर्थं परम्परानुसारं प्रतिवर्षमिव वर्षेऽस्मिन्नपि नवरात्रमहोत्सवोऽनुभावितः । प्रसङ्गेऽस्मिन् आदौ दुर्गापूजनं ततश्च रासक्रीडा अन्ते प्रसादवितरणमल्पाहार-ग्रहणञ्चाभवत् । अत्र षड्विद्यार्थिनः षड्विद्यार्थिन्यश्च भूषाक्रीडेति स्पर्धाद्वये ये प्रथम-द्वितीय-तृतीयक्रमासनाः सञ्जातास्तेभ्यः कुलपतिमहोदयानां वरदहस्ताभ्यां पारितोषिकप्रदानमपि समजायत । एवमत्र ''उत्सवप्रियाः खलु मनुष्याः'' उक्तिरियं यथार्थतां प्रापिता । अस्य कार्यक्रमस्यायोजनं सांस्कृतिकसमितिद्वाराऽजायत । प्रसङ्गेऽस्मिन् प्रसन्नमनसा कतिपयप्राध्यापकैः आर्थिकसहयोगोऽपि प्रदत्तः तदर्थं ते धन्यवादार्हाः ।

संस्कृतविज्ञानप्रदर्शनी

गुजरातप्रान्तस्य संस्कृतकार्यकर्तृणां प्रथमवारं गान्धीनगरे २४ – २५ दिसेम्बर् मासे 'द्विदिवसीय-प्रान्तीयम् अधिवेशनम्' अभवत् । अस्मिन् अपूर्वे अधिवेशने संस्कृतप्रदर्शनीविभागे श्रीसोमनाथसंस्कृतविश्वविद्यालयोऽपि 'संस्कृतविज्ञानगौरवप्रदर्शनीं' प्रादर्शयत् । अस्यां प्रदर्शन्यां चित्ताकर्षकचित्रेण सह षोडशसंस्काराणां, अष्टादशपुराणानां, साहित्यस्य नानाविधचित्रबन्धानां, न्यायदर्शनवैज्ञानिकतथ्यानां, प्राचीनार्वाचीनज्ञान-विज्ञान-शैक्षणिकविषयाणां च प्रदर्शनेन बहवः जनाः कार्यकर्तारश्च लाभान्विताः शिक्षिताश्च अभवन् । विश्वविद्यालयस्य प्राध्यापकानां कर्मचारिणां छात्राणां च सहयोगेन बुद्धिवैभवेन ज्ञानप्रदर्शनेन इयं प्रदर्शनी सफलताम् अवाप । डॉ.ललितकुमारपटेलः डॉ.जानकीशरणश्च अस्य संयोजनमकुरुताम् ।

।। नवमः युवमहोत्सवः ।।

२४-१०-२०१५ तः २६-१०-२०१५ दिनाङ्कं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नवमः युवमहोत्सवः श्रीभागवतविद्यापीठ-सोला-अमदावादे समायोजितः। २४ तमे दिनाङ्के अस्य युवमहोत्सवस्य उद्घाटनसमारोहः आसीत्। तस्मिन् समारोहे सारस्वतातिथिरूपेण श्रीजगद्गुरुरामानन्दाचार्यसंस्कृतविश्व-विद्यालयस्य मान्याः कुलपतयः प्रो.विनोदकुमारशर्ममहोदयाः, सम्मान्यातिथिरूपेण भागवतविद्यापीठस्य श्रीभागवत-ऋषयः, दर्शनम्-संस्कृतमहाविद्यालयस्य श्रीबालकृष्णपुराणिमहोदयाः, समारोहस्य अध्यक्षत्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्याः कुलपतयः प्रो.अर्कनाथचौधरीमहोदयाःच समुपस्थाय उद्घाटनसत्रमलङ्कृतवन्तः। एते महानुभावाः स्वीयया उपस्थित्या आशीर्वचोभिश्च स्पर्धालूनां छात्राणाम् उत्साहवर्धनमकुर्वन्।

युवमहोत्सवेऽस्मिन् अष्टाविंशति(२८)महाविद्यालयानां चतुर्दशोत्तरचतुश्शतं(४१४)छात्राः विविधासु क्रीडा-शैक्षिक-सांस्कृतिकस्पर्धासु भागं गृहीत्वा स्वकौशलं प्रदर्शितवन्तः। तृतीये दिवसे २६ तमे दिनाङ्के युवमहोत्सवस्य सम्पूर्तिसमारोहः समजायत। तस्मिन् समारोहे विविधस्पर्धासु विजेतृभ्यः पुरस्कार-पदक-प्रमाणपत्राणि प्रदत्तानि। सम्पूर्तिसमारोहे विशिष्टातिथिरूपेण गुजरातराज्यस्य सचिवचराः श्रीभाग्येशज्हामहोदयाः, अध्यक्षत्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्याः कुलपतयः प्रो.अर्कनाथचौधरीमहोदयाः स्वीयोपस्थित्या कार्यक्रममलङ्कृतवन्तः। कुलसचिववर्याः डॉ.दशरथजादव-महोदयाः विजेतृभ्यः आशीर्वचांसि प्रदत्तवन्तः। सम्पूर्णस्य युवमहोत्सवस्य संयोजकत्वं डॉ.ललितकुमारपटेलः सहसंयोजकत्वञ्च डॉ.अमृतलालभोगायता तथा च जयेशमुंगरा अकुरुताम्। अस्मिन् नवमयुवमहोत्सवे श्रीसोमनाथसंस्कृतविश्वविद्यालय-वेरावलस्य छात्रैः प्रथमक्रमेण सह विजयवैजयन्ती अवाप्ता। श्रीनवजागृतिमहाविद्यालयः (व्यारा) द्वितीयपुरस्कारं प्राप्तवान्। युवमहोत्सवे स्पर्धासु विजेतृणां नामानि इत्थं वर्तन्ते -





No.	Name	Mahavidyalay / College
	100 Metres (Male)	
1	CHAUDHARI RASHIKKUMAR SURESHBHAI	NSM - VYARA
2	DAVE SHANIKUMAR DINESHBHAI	AVSM - JAMNAGAR
3	UPADHYAY CHIRAG GAUTAMBHAI	BSM - NADIAD
	100 Metres (Female)	
1	GAMIT KALPANABEN NATUBHAI	NSM - VYARA
2	GAMIT SANJANABEN RAKESHBHAI	SSSU - VERAVAL
	200 Metres (Male)	
1	GAMIT BHAVESHBHAI LALJIBHAI	NSM - VYARA
2	JOSHI VIPUAL KANUBHAI	ASM - AMBAJI
3	RAVAL DINESHKUMAR BABUBHAI	BVSM (B.Ed.) - SOLA
	200 Metres (Female)	
1	GAMIT SANJANABEN RAKESHBHAI	SSSU - VERAVAL
2	GAMIT MADHURIBEN SATISHBHAI	NSM - VYARA
	400 Metres (Male)	
1	BHATT MAULIK ARVINDBHAI	DSM-SGVP - CHHARODI
2	JOSHI KISHAN RAMESHKUMAR	AVSM - JAMNAGAR
3	CHAUDHARI JOGINDARBHAI RAMAJBHAI	NSM - VYARA
	400 Metres (Female)	
1	GAMIT KALPANABEN NATUBHAI	NSM - VYARA
2	GAMIT RINKALBEN ARUNBHAI	SSSU - VERAVAL
	1500 Metres (Male)	
1	CHAUDHARI RASHIKKUMAR SURESHBHAI	NSM - VYARA
2	MODH MUKESHKUMAR BBALDEVBHAI	ASM - AMBAJI
3	JOSHI GAUTAM AMRUTBHAI	SBSM - PORBANDAR
	CHESS (Male)	
1	RAVAL SACHIN PRADYUMANBHAI	BVSM (B.Ed.) - SOLA
2	JOSHI HARDIK JAYPRAKASHBHAI	VSM - SOLA
3	DHATURIYA HITESH MADHUKARBHAI	SSSU - VERAVAL
	CHESS (Female)	
1	KOTVALIYA AELISHABEN MANJIBHAI	NSM - VYARA
2	CHAUDHARI PRITIBEN RASHIKBHAI	SSSU - VERAVAL
	YOGA (Male)	
1	JOSHI MEHUL DEVCHANDBHAI	ASM - AMBAJI
2	JOSHI ASHISH JAYANTIBHAI	BSM - NADIAD
3	GAMIT PINTU VASANTLAL	SSSU - VERAVAL
	YOGA (Female)	
1	BAMROTIYA ASMITA DHIRUBHAI	SSSU - VERAVAL
2	GAMIT KALPANABEN NATUBHAI	NSM - VYARA
	WRESTLING KG 50	
1	CHAVDA RAMESH DAHYALAL	SSSSVV - SAMAKHYALI
2	GAMIT PINTU VASANTLAL	SSSU - VERAVAL
3	SHUKLA PREMAL MUKESHBHAI	DSM-SGVP - CHHARODI
3	VYAS MEHUL RAJESHBHAI	BYVSM - MUDETI
	WRESTLING KG 55	
1	UPADHYAY CHIRAG GAUTAMBHAI	BSM - NADIAD
2	KHANDEKA ARVIND AMBARAMBHAI	SSSU - VERAVAL
3	DAVE JAYDEV VINUBHAI	DSP - DAKOR
3	JOSHI BHARAT TALABHAI	DSM - SGVP - CHHARODI
	WRESTLING KG 60	
1	MAHETA KISHAN VALLABHBHAI	BCVV - DWARKA
2	PATHAK ANKURKUMAR HARSHADBHAI	NSP - ANAND
3	VYAS HARIN JASHMINBHAI	SBSM - PORBANDAR
3	JHA KANHAIYA GARIBNATHA	SRSM - AHEMDABAD

No.	Name	Mahavidyalay / College
	WRESTLING KG 66	
1	JOSHI JAYDEVBHAI DAYARAMBHAI	BVSM (B.Ed.) - SOLA
2	JOSHI AJAY JAMNASHANKAR	SSSSVV - SAMAKHYALI
3	CHOURASHIYA AKASH DHARMENDRABHAI	DSP - DAKOR
3	PANDYA KARTIK BHAGVATBHAI	BYVSM - MUDETI
	WRESTLING KG 74	
1	SHARMA NANDKISHOR JAGDISHPRASAD	SRSM - AHMDABAD
2	VYAS RAVISHANKAR JITENDRABHAI	BSM - NADIAD
3	JOSHI JIGAR RAYMALBHAI	SSSSVV - SAMAKHYALI
3	VASAVA PRAGNESHKUMAR GANPATBHAI	NSM - VYARA
	DISK THROW (Male)	
1	BHATT VRAJESH JAYDEEPBHAI	VSM - SOLA
2	SOLANKI RAJUBHAI JASWANTBHAI	NSM - VYARA
3	TRIVEDI JAYKUMAR KRUSHANAKANT	BVSM (B.Ed.) - SOLA
	DISK THROW (Female)	
1	CHAUDHARI AMBABEN GUMANBHAI	SSSU - VERAVAL
2	GAMIT SANGITABEN GULABBHAI	NSM - VYARA
	SHOT PUT (Male)	
1	BHATT VRAJESH JAYDEEPBHAI	VSM - SOLA
2	JOSHI NIRAV HITENDRABHAI	BSM - NADIAD
3	JOSHI KISHAN RAMESHKUMAR	AVSM - JAMNAGAR
	SHOT PUT (Female)	
1	CHAUDHARI AMBABEN GUMANBHAI	SSSU - VERAVAL
2	GAMIT SANGITABEN GULABBHAI	NSM - VYARA
	HIGH JUMP (Male)	
1	BHATT DALSUKH KANTIBHAI	DSM SGVP - CHHARODI
2	DAVE SHANIKUMAR DINESHBHAI	AVSM - JAMNAGAR
3	RAJYAGURU CHINTAN JAYANTKUMAR	VSM - SOLA
	HIGH JUMP (Female)	
1	GARAIYA BHAVNA RAYDHANBHAI	SSSU - VERAVAL
2	GAMIT MADHURIBEN SATISHBHAI	NSM - VYARA
	LONG JUMP (Male)	
1	JOSHI MAHESH NARANBHAI	AVSM - JAMNAGAR
2	PANDEY RAVIKANT JAYPRAKSH	MSM - MAGOD
3	JOSHI SACHIN SANJAYBHAI	DSM-SGVP - CHHARODI
	LONG JUMP (Female)	
1	CHAUDHARI PRITIBEN RASHIKBHAI	SSSU - VERAVAL
2	GAMIT AMITABEN NASVANBHAI	NSM - VYARA
	BADMINTON SINGLE (Male)	
1	BHATT MEHULKUMAR UPENDRABHAI	V.T.C.SSM - SURAT
2	RAVAL VED BHARATBHAI	DSM SGVP - CHHARODI
3	PUROHIT AAKASH PRAVINBHAI	SSSU - VERAVAL
	BADMINTON SINGLE (Female)	
1	GAMIT RINKALBEN ARUNBHAI	SSSU - VERAVAL
2	CHAUDHARI SANDHYABEN KOTALABHAI	NSM - VYARA

No.	Name	Mahavidyalay / College
	BADMINTON DOUBLE (Male)	
1	VAIRAGI VIKAS ISWARLAL	V.T.C.SSM - SURAT
	BHATT MEHULKUMAR UPENDRABHAI	V.T.C.SSM - SURAT
2	MAHETA HARDIKKUMAR SURESHBHAI	VSM - SOLA
	JANI SAGAR MANOJBHAI	VSM - SOLA
3	JOSHI SUNIL DURGASHANKARJI	ASM - AMBAJI
	SHARMA VINOD BANSHILAL	ASM - AMBAJI
	BADMINTON DOUBLE (Female)	
1	GAMIT RINKALBEN ARUNBHAI	SSSU - VERAVAL
	CHAUDHARI AMBABEN GUMANBHAI	SSSU - VERAVAL
2	CHAUDHARI SANDHYABEN KOTALABHAI	NSM - VYARA
	GAMIT KALPANABEN NATUBHAI	NSM - VYARA
	KABADDI	
1	DSM SGVP - CHHARODI	
2	BSM - NADIAD	
3	NSM - VYARA	
	AASHU CHITRAM	
1	TADPADA ARVINDBHAI JAVERBHAI	NSP - ANAND
2	DAVE KRUTARTH RAKSHESHKUMAR	NSVP - BHARUCH
3	KOTVALIYA AELISHABEN MANJIBHAI	NSM - VYARA
	CARTOON PAINTING	
1	GOHIL HIRANSINH BHIMABHAI	SSSU - VERAVAL
2	TADPADA ARVINDBHAI JAVERBHAI	NSP - ANAND
3	JOSHI KISHAN RAJESHKUMAR	DSM SGVP - CHHARODI
	RANGOLI	
1	MAHETA KIRANKUMAR ASHOKBHAI	BSM - NADIAD
2	DAVE KRUTARTH RAKSHESHKUMAR	NSVP - BHARUCH
3	RAJPUROHIT GAJENDRA RAMESHBHAI	VSM - SOLA
	EKAKI SHASTRIYA SONG	
1	MAHETA SUNIL NARENDRABHAI	SBSM - PORBANDAR
2	JOSHI AAKASH ATULBHAI	VSM - SOLA
3	JOSHI KUSH DHARMESHBHAI	BVSM (B.Ed.) - SOLA
	SANSKRIT SONG	
1	SONPAL MIHIRKUMAR RAMESHCHANDRA	AVSM - JAMNAGAR
2	MAHETA SUNIL NARENDRABHAI	SBSM - PORBANDAR
3	BHATT ASHISH NARBHESANKARBHAI	AVSM - JAMNAGAR
	SHUBHASHIT KANTH PATH	
1	TERAYA SAGAR HASMUKHBHAI	DSM SGVP - CHHARODI
2	PANDYA RAKESHKUMAR SATISHBHAI	SSSU - VERAVAL
3	JOSHI KUSH DHARMESHBHAI	BVSM (B.Ed.) - SOLA
	EK PATRA ABHINAY	
1	PUROHIT AAKASH PRAVINBHAI	SSSU - VERAVAL
2	TRIVEDI DIVYANG RAMESHBHAI	DSM SGVP - CHHARODI
3	PUROHIT MEHUAL NATUBHAI	AVSM - JAMNAGAR
	GROUP DANCE	
1	NSM - VYARA	
2	SSSU - VERAVAL	
3	AVSM - JAMNAGAR	

No.	Name	Mahavidyalay / College
	SHASTRIYA NRUTYA	
1	JOSHI SAGAR DHARMENDRABHAI	VSM - SOLA
2	JOSHI SAURABH BADRINARAYAN	BSM - NADIAD
3	CHAUDHARI AMBABEN GUMANBHAI	SSSU - VERAVAL
	SHASTRIYA VADAN	
1	UPADHYAY NIKHIL BHARATKUMAR	VSM - SOLA
2	VEGDA SAGAR PRAVINBHAI	DSM - SGVP - CHHARODI
3	RAVAL SACHIN PRADHUMANBHAI	BVSM (B.Ed.) - SOLA
	AASHU BHASHANAM	
1	KHANDEKA DHAVAL AMARSHIBHAI	BVSM (B.Ed.) - SOLA
2	SADHU CHETANKUMAR JANAKDASH	VSM - SOLA
3	JOSHI HARESH DHANJIBHAI	VSM - SOLA
	VADVIVAD PAKSHA	
1	KHANDEKA DHAVAL AMARSHIBHAI	BVSM (B.Ed.) - SOLA
2	BHATT MAULIK ARVINDBHAI	DSM - SGVP - CHHARODI
3	RAJYAGURU CHINTAN JAYANTKUMAR	VSM - SOLA
	VADVIVAD VIPAKSHA	
1	JOSHI HARESH DHANJIBHAI	VSM - SOLA

No.	Name	Mahavidyalay / College
2	PANDEY ARUNKUMAR DEVANANDBHAI	SSSU - VERAVAL
3	TRIVEDI DIVYANG RAMESHBHAI	DSM - SGVP - CHHARODI
	SAHITYA RACHNA	
1	THAKAR RAJESH GOVINDBHAI	VSM - SOLA
2	PANDEY ARUNKUMAR DEVANANDBHAI	SSSU - VERAVAL
3	PANDIT VRAJESH PRADIPBHAI	SNSM - PETLAD
	QUIZ	
1	BHATT JIGAR MAHESHBHAI & PANDEY ARUNKUMAR DEVANANDBHAI	SSSU - VERAVAL
2	VYAS RUSHI NILESHBHAI & THAKAR RAJESH GOVINDBHAI	VSM - SOLA
3	PANDYA TUSHAR NITINBHAI & KHANDEKA DHAVAL AMARSHIBHAI	BVSM (B.Ed.) - SOLA
	VOLLEYBALL	
1	AVSM - JAMNAGAR	
2	SSSU - VERAVAL	
3	VSM - SOLA	





INDIVIDUAL ACHIEVEMENTS

Dr. Kartik Pandya (Research Officer)

- Editor in the Eleventh Issue of the Somajyotiḥ - Shree Somnath Sanskrit University Newsletter that was published in January 2016.
- Co-ordinator of Two-Day National Convention on "Atharvaveda" organised by Shree Somnath Sanskrit University, Veraval at Shri Brahmarshi Sanskrit Mahavidyalaya, Nadiad during 10th & 11th June, 2015.
- University Nodal Officer to All India Survey on Hogher Education for the year 2015-16 and ranked the FIRST in the entire Gujarat state for uploading the data in DCFs on its portal online in its stipulated time limit.
- Participated and presented a research paper entitled as "Energising Cultures in the Atharvaveda with special reference to the Bhūmisūkta" in Three-Day International Seminar organised by Department of Sanskrit, School of Languages, Gujarat University, Ahmedabad at Gujarat University Convention Hall during 3rd & 5th December, 2015.

ALL OVER TOPPERS
Shree Somnath Sanskrit University
APRIL- 2015

Rank	Class	Student's Name College Name	Percentage	Grade	Special-Subject
1	TYBA (Shastri)	**ODICH DHAVAL DEVRAJBHAI** Aanandbava Vedant Sanskrit Mahavidyalaya, Dhorivav	81.09	Distinction	NAVYA VYAKRAN
2	TYBA (Shastri)	**PANDYA HARDIK VIJAYKUMAR** Dakor Sanskrit Pathshala, Dakor	79.37	Distinction	SAHITYA
3	TYBA (Shastri)	**RAJYAGURU HITESHKUMAR NITINBHAI** Aanandbava Vedant Sanskrit Mahavidyalaya, Dhorivav	79.22	Distinction	NAVYA VYAKRAN
1	MA-2 (Acharya)	**DAVE NITIN LABHSHANKARBHAI** P.G. Department, S S S U, Veraval	80.88	Distinction	SHUKLA YAJURVED
